No. २०६ ख

Title धर्मशास्त्रे दायभागः

Author

Extent ६ पत्र Age

Subject धर्मशास्त्र

धर्मशास्त्रदायभागः

१.



नं १४

नं. १०६

पित्र्यस्य तु नैर्यत्र प्रकल्प्यते। दायभाग इति प्रोक्तं तद्विवादपदं बुधैः। पितृत आगतं पित्र्यं। तत्र पितृमरणोपजातस्वत्वमुच्यते। पित्र्यस्येति पुत्रैरिति च द्वयमपि संबंधिमात्रोपलक्षणं। संबंधमात्रेण संबंधिमात्रधन २

श्रीगणेशाय नमः॥ मन्वादिवाक्यान्यविमृश्य येषां यस्मिन्विवादो बहुधा बुधानां। तेषां प्रबोधाय स दायभागो निरूपणीयः सुधियः शृणुध्वं १ अथ दायभा
१ गो निरूप्यते॥ तत्र नारदः॥ विभागोर्थस्यँ विभागे पित्र्यदायभागपदप्रयोगात्। अत एव दायभागं विवादपदमुपक्रम्य नारदो मात्रादिधनविभागमप्युपदर्शि
तवान्॥ तथा मनुरपि पित्रादिपदमकृत्वैव। एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः॥ आपद्यपत्यप्राप्तिश्च दायभागं निबोधत इत्युपक्रम्य समस्तसंबंधिध
नविभागमुक्तवान्॥ दीयत इति व्युत्पत्त्या च दायशब्दो ददातिपदप्रयोगश्च गौणः॥ मृतप्रव्रजितादिस्वत्वनिवृत्तिपूर्वकपरस्वत्वापत्तिफलसाम्यात्। ननु मृतादीनां त
त्र त्यागोस्ति। ततश्च पूर्वद्रव्यस्वामिसंबंधाधीनं तत्स्वाम्युपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढो दायशब्दः। ननु किं दायस्य विभागो विभक्तावयवत्वं यद्वा दायेन सह
विभागोऽसंयुक्तत्वं। न तावत्पूर्वः दायस्य विनाशापत्तेः॥ नापि द्वितीयः। संयुक्तेपि न ममेदं विभक्तं भ्रातुरिदमिति प्रयोगसंबंधाविशेषात् सर्वेषां सर्वधनोत्पन्न
स्वत्वस्य द्रव्यविशेषे व्यवस्थापनं विभाग इति वाच्यं। संबंधान्तरस्याभावप्रतिपक्षस्य संबंधस्यावयवेष्वेव विभागत्वं ग्यस्वत्वापादकत्वात्। कृत्स्नधनगतस्वत्वो
त्पादविनाशकल्पनागौरवात्॥ यथेष्टविनियोगाभावेनानुपयोगाच्च॥ उच्यते। एकदेशोपात्तस्यैव भूहिरण्यादावुत्पन्नस्य स्वत्वस्य प्रमाणाभावेन वैशेषिकव्यवहा
रानर्हतया अव्यवस्थितस्य गुटिकापातादिना स्वत्वव्यंजनं विभागः। विशेषेण भजनं वा विभागः॥ यत्रापि चैकं दासीगवादिकं बहुसाधारणं तत्रापि तत्कालवि एम०
शेषव्यवहनदोहनादिफलेन स्वत्वं व्यज्यते। तदाह बृहस्पतिः॥ एकां स्त्रीं कारयेत्कर्म यथांशेन गृहे गृहे। उद्धृत्य कूपवाप्यंभस्त्वनुसारेण गृह्यते। युक्त्या विभज १

फलात् २ स्वत्वज्ञापनं २ गारनचम विनिगमना २

नीयं तदन्यथानर्थकं भवेदिदं श्लोकार्द्धत्रयं नानास्थानस्थं नतु समक्रमकं ॥ ननु पितर्यूर्द्ध्वं गते पुत्रा विभजेयुरूर्द्ध्वं पितुरिति नारदवचनात्। पितुरूर्द्ध्वं विभजेयुरिस
त्ययाद्विभागात् पूर्वं पुत्राणां न तत्र स्वत्वं। न च विभागस्य स्वत्वकारणता अस्य संबंधिधने प्रतिप्रसंगात्। उच्यते पित्रादिनिधनानंतरमेवास्मदीयमिति प्रयोगात्
एकपुत्रे विभागं विनैव स्वत्वस्वीकारात् संबंधिनिधनमेव स्वत्वकारणं अतो नातिप्रसंगः। ननु अर्जयितृव्यापारोऽर्जनं अर्जनाधीनस्वामिभावश्चार्जे
पितानेन पुत्रव्यापारो जन्मैवार्जनं युक्तं। अतो जीवत्स्वेव पितरि पुत्राणां तत्र स्वत्वं न तु तन्निधनात्। अत एवोक्तं क्वचिज्जन्मैव यथा पित्र्ये धने। नैतत्
मन्वादिविरोधात्। यथा मनुः ऊर्द्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समं। भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोः। जीवतोरपि पुत्राणां कुतो न विभाग इत्याशं
कायामिदमुक्तं तदानीमस्वामित्वादिति न च भार्यापुत्रश्चेत्यादिवत्स्वातंत्र्याभिप्रायमिति वाच्यं ॥ तदानीं स्वत्वे प्रमाणाभावात्। भार्यादिषु तु यत्ते समधिगच्छंति
अर्जयंतीति स्वत्वे सिद्धे युक्तं यस्वातंत्र्यवर्णनं। किंच स्वोपार्जिते पित्रेषामस्वामित्वे धनस्याध्यवैदिककर्मोच्छेदात् श्रुतिविरोधः स्यात्। केवलस्य पितृधनेऽप्यस्वाम्य
मेवृष्टपतितया पितर्युपरते पुत्रा विभजयेयुरूर्द्ध्वं पितुः ॥ अस्वाम्यं तु भवेदेषां निर्दोषे पितरि स्थिते। किंच जीवत्यपि पितरि पितृधने पुत्राणां स्वामित्वे पितु
रनिच्छयापि विभागः स्यात् जन्मैव स्वत्वकारणमिति प्रमाणाभावाच्च अर्जनरूपतया जन्मनः स्वत्वावनधिगमात्। क्वचिज्जन्मैवेति च जन्मनिबंधनत्वात् पितृपु
त्रसंबंधस्य पितृमरणस्य च स्वत्वकारणत्वात्। परंपरया वर्णनं। अन्यव्यापारेणान्यस्य स्वत्वमविरुद्धं शास्त्रमूलत्वादस्यार्थस्य। दृष्टं च लोकेऽपि। दाने हि चेतनोद्देशविशि

ष्टसागादेवदात् व्यापारात् संप्रदानस्य द्रव्ये स्वामित्वं। न च स्वीकारात् स्वत्वं स्वीकर्तुरेव दातृत्वापत्तेः। परस्वत्वापत्तिफलेन हि दानरूपतानच्च फलं संप्रदानाधीनं यथा
२ हि देवतोद्देशेन द्रव्यत्यागं कुर्वन्नपि यजमानो न होता। किं तु तत्स्यैव त्यागस्य होमाभिधाननिमित्तं प्रक्षेपं कुर्वन्नृत्विगेव होतेत्युच्यते तद्वद्दातापि स्यात्। किं
2 च मनसा पात्रमुद्दिश्येत्यादिशास्त्रे स्वीकारात् प्रागेव दानपदं दृष्टं। ननु ग्रहणं स्वीकारः। अप्रभृततज्ज्ञावेच्छिप्रयोगात्। अप्रस्वं स्वं कुर्वन् व्यापारः स्वीकारो भवति कथं
स्वत्वं५ ततः प्रागेव स्वत्वं। उच्यते। उत्सन्नमपि स्वं प्रदानव्यापारेण ममेदमिति ज्ञानेन स्वं गृहाण इदं क्रियत इति स्वीकारशब्दार्थः। याजनाध्यापनसाहचर्याच्च प्रतिग्रहस्य
स्वत्वमर्जनयत्नोप्यर्जनरूपतानविरुद्धा। याजनादौ दक्षिणादानादेव स्वत्वात्। पितृनिधनकालीनं वा जीवनमेव पुत्रस्यार्जनं भविष्यति। किं च भ्रात्रादिधनेन
दा०त्रा५ न्मरणान्नन्मरणकालीनजीवनाँत्रेतरादेः स्वत्वमकामेनापि वाच्यं। अत ऊर्द्ध्वं पितुश्चेत्यादि तत्कालीनस्वत्वज्ञापनार्थं। तदानीमेव रिक्थप्राप्तं विभागमनुवदति =दृष्टा५=
प्राप्तेत द्विधानानुपपत्तेः। न च नियमः संभवति। एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया इति मनुविरोधात्। दृष्टार्थत्वाच्च विभागस्य न तन्नियमः कालनियमो वा संभ
वति। किं च पितर्युपरते उत्तरकाल एव विभागं स्यात्। ननु शुक्रात् दपि। जातेष्टिवज्जातप्राणवियोगोर्पत्तिसमनियमस्यात्र विरोधाभावात् पितुपरमानंतर्यस्य
च यावज्जीवपर्यन्तस्य स्वेच्छात एव प्राप्तत्वात्। अतो जीवति पितरि सत्यपि पुत्राणां स्वाम्ये विभागनिषेधार्थं वचनं वाच्यं। तच्चान्याय्यं। अप्रत्यार्थकत्वापत्तेः। अतो दा०भा०
जीवतोः पित्रोः तद्धने स्वाम्यं नास्ति किं तूपरतयोस्तयोरिति ज्ञापनार्थमिदं वच[redacted]नं। एकः शाब्दः।। अपपराष्ट्वार्थः न चोपरममात्रमेव विवक्षितं। किं तु पतितप्रव्रजि २

अर्थः

तत्वाद्य पित्राह्रियंते स्वत्वविनाशहेतुसाम्यात्। न हि हनारदः। मातुर्निवृत्ते रजसि दत्तासु भगिनीषु च विनष्टे वाप्यशरणे पितर्युपरतस्पृहे। विनष्टे पतिते ऽश
रणे। गृहस्थाश्रमरहिते। यदा निवृत्ते वापि मरणादिति पाठस्तदा मरणान्निवृत्ते जीवति निःस्पृहे इति पाठांतरमनाकरं॥ अत्रापुपरतस्पृहत्वादिना
पुत्राणां स्वत्वं पितृधने भवतीति स्वापनाद्यमेकः कालो विभागस्येत्यापाद्यो ऽनूद्यते। आस्य तु सारितादनुवादस्य। स्वामित्वाच्च प्राप्तेः। एकस्यापि स्वधने स्वा
म्यादेकेछयापि विभागप्राप्तेः॥ समेस्येति सहितत्वं पक्षप्राप्तमनूद्यते। अन्यथा साहित्स बहुत्वस्याप्यवगते द्वयोर्विभागो न स्यादेव। द्वयोर्विभागप्रतिपादक शा
स्त्राभावात्। ननु परेते पितरि ज्येष्ठ एव धनाधिकारी नेतरो यथा ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः॥ शेषास्तमुपजीवेयुर्यथैव पितरं तथा। ज्येष्ठोऽत्रनु
नामरकाद्यावर्तकोऽभिप्रेतो न तु जीवदपेक्षः। मनुः ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः। पितॄणामनृणश्चैव स तस्मात्सर्वमर्हति। यस्मिन्नृणं संन
यति येन चानंत्यमश्नुते॥ स एव धर्मजः पुत्रः कामजानितरान्विदुः। नैतत्। सर्वेच्छाधीन ज्येष्ठाधिकारश्रुतेः यथा नारदः। बिभृयाद्वेच्छतः सर्वान् ज्येष्ठो भ्रा
ता यथा पिता। भ्राता शक्तः कनिष्ठो वा शक्त्यपेक्षा कुले स्थितिः॥ सर्वेच्छया कनिष्ठोऽपि शक्तः सन् बिभृयादिति॥ ज्येष्ठता चातंत्रा। मनुः॥ एवं सह वसेयुर्वा पृथ
ग्वा धर्मकाम्यया। पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया। सह पृथग्वेति पदाभ्यां चेच्छातो वैकल्पिकत्वं दर्शयति। तदेवं पितृस्वत्वापगम एकः कालः। अपर
स्त्वानपगत एव पितृस्वाम्ये पितुरिच्छयेति कालद्वयं॥ न पुनः पितर्युपरत इति एकः कालः। पितर्युपरतस्पृहे मातुश्च निवृत्ते रजसि द्वितीयपरः। अनिवृत्ते पि मा

तरजसि पितरि सस्पृहे तदिच्छयेति कालत्रयमादरणीयं। मातरजोनिवृत्तेः पितुरुपरतस्पृहत्वविशेषणात् त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीं। त्र्यष्टवर्षोऽष्टवर्षां वा
२ धर्मे सीदति सत्वरः इति मनुना विवाहविधानात्तत्वनं पंचाशतोऽब्जे दिसाश्रमांतरगमनकालविधानात्तदाचरजोनिवृत्ते मातुरसंभवे पितरि चोपरतस्पृहे वान
प्रस्थे पुत्राणामिच्छतामप्यविभागप्रसंगात्। निर्विशेषणमुपरतस्पृहत्वमेव पितृधनविभागकाल इति चेत्। न। अनुपरतस्पृहे पितरि पतितेऽप्यविभागप्रसं
गात्। अयमपरः कालद्वयमभिधाने कालचतुष्टयापत्तिः॥ पितुरुपरमः पतितत्वं निस्पृहत्वं इच्छा चेति यच्च कार्याक्षमे पितरि पुत्राणां विभागे स्यात्तं अयुक्तं तद्वच
नार्थानभिज्ञत्वेन तथा च हारीतः॥ जीवति पितरि पुत्राणामर्थादानविसर्गाक्षेपेषु न स्वातंत्र्यं। कामंदीने प्रोषिते आर्त्तिंगते वा ज्येष्ठोऽर्थांश्चिंतयेत्। उत्क्रमा
हतुः शंखलिखितौ पितर्यशक्ते कुटुंबव्यवहारान् ज्येष्ठः प्रतिकुर्यात्। अनंतरो वा कार्यज्ञः तदनुमतेर्वा। न त्वकामे पितरि रिक्थविभागो वृद्धे विपरीतचेतसि दीर्घरोगि
णि वा ज्येष्ठ एव पितृवदर्थान्पालयेत् इतरेषां रिक्थमूलं हि कुटुंबं अस्वतंत्राः पितृमंतो मातुरप्येव मद्यस्थितायाः। एतद्वचनद्वयं कार्याक्षमे दीर्घरोगिणि च पितरि विभा
१६ गं निषिध्य ज्येष्ठ एव गृह्यं चिंतयेत्। तदनुजो वा कार्यज्ञ इत्याह। अतो न त्वकामे पितरि इत्येतदेव कार्याक्षमे पितरि रिक्थविभाग इति भ्रांतिलिखितं। तस्मात्पतितत्वनि
स्पृहत्वोपरमैः स्वत्वापगम एकः कालः। अपरश्च सति स्वत्वे तदिच्छात इति कालद्वयमेव युक्तं। मातुर्निवृत्ते रजसीति तु पितामहादिधनाभिप्रायं। निवृत्ते रज एम०
सि पुत्रांतरसंभवाभावात्तदानीमपि पितुरिच्छयैव पुत्राणां विभागः। अनिवृत्ते रजसि कृते भागे तु धनविभागे पश्चाज्जातानां वृत्तिलोपापत्तेः। न चासौ युक्तः। २

= [redacted] पित्रादिभक्ताविभागे॰ १ =

दत्तोमवरहेलमि

ये जाता ये प्यजाताश्च ये च गर्भे व्यवस्थिताः । वृत्तिं ते पि हि कांक्षंति वृत्तिलोपो न विद्यत इति वचनात् । यत एव पितृधने कालद्वयं । अत एव मनुगौतमादिभिर्मृते तपदं परिस

ज्य ऊर्द्ध्वमित्युक्तं । ऊर्द्ध्वं पितुरिति । पितुस्तदात्वलापगमात्तदर्थमेव ऊर्द्ध्वमित्यभिधानं । अतो यमेको विभागकालः । ऊर्द्ध्वं विभागाज्जातस्तु हस्तेनैव न च सस्पृहे पितरि त

दिच्छया विभागकालोऽपरो दर्शितः ॥ दत्त्वा सुभगिनीषु चेति न कालान्तरार्थं । किंतु तासामव्रपदानार्थं । यथांशयच्छिष्टं पितरस्ये भ्यो दत्तांशं पैतृकं ततः ॥ भ्रातृभि

स्तु द्विभक्तमृणं न स्याद्यथा पिता दद्यात् वचनं पितृऋणशोधनावशिष्टं भावार्थं न विभागकालार्थं । अस्माच्चानादेवचनाद्यमर्थः सिद्ध्यति । यतो विभा

गकर्तृभिः ऋणमृणानुमत्से वृपित्रा दत्तं विभजनीयं । परिशोध्यं वा शोधनावशिष्टधनविभागप्रतिपादनस्यैव तत्प्रयोजनत्वात् । अत एव मातृधनस्यापि ऋणा

वशिष्टस्यैव विभागमाह याज्ञवल्क्यः ॥ मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः । एतच्च विस्तरेण स्त्रीधनप्रकरणे वक्ष्यते । यद्वा दत्त्वा सुभगिनीषु मातृधनं पुत्रैरेव विभ

जनीयं । अपरत्नास्तु ताभिः सह समधारणं । एतच्चावसरे वाच्यं । एवं तावत्पितृधनविभागकालद्वयमुक्तं । संप्रति पितामहादिधनविभागकालोऽभिधीयते । तत्र

बृहस्पतिः । पित्रोरभावे भ्रातॄणां विभागः संप्रदर्शितः ॥ मातुर्निवृत्ते रजसि जीवतोरपि शस्यते । नास्य वचनस्य पितृधनगोचरत्वं । ऊर्द्ध्वं विभागाज्जातस्त्विति सप्तनि

र्विषयत्वापत्तेः । निवृत्ते रजसि पुत्रोत्पत्त्यभावात् । मातृधनविषयत्वं च नाशंकनीयं । एवं मातुरेव निर्द्देशनत्वापत्तेः । अतो निवृत्ते रजसीति पैतामहादिधनविषयं । न चेच्छा

मनपेक्ष्य रजोनिवृत्तिर्विभागनिमित्तं संभवतीति पितुरिच्छया विभागाभावात् स स्वामिच्छायां कस्येच्छेत्यपेक्षायां ऊर्द्ध्वं पितुः पुत्रा रिक्थं विभजेयुः निवृत्ते रजसि

=जीवद्विभागे तु पिता न्यूनहीनां ... =

मातुर्जीवति चैच्छतीति गौतमवचनात् पितुरेवेच्छात इति निर्णीयते। अतः पित्रोरभाव इत्येकः कालः पित्रोरिति द्विवचननिर्देशात्सोदरभ्रातॄणां पितृधनविभागो
५ ऽपि मातुरभाव एव धर्म्यः न तु मातृधनविभागार्थं मातुरभावस्योपादानं। जीवतोरपीत्यस्य मातृधनगोचरत्वानुपपत्तेरन्यधनगोचरत्वमवश्यं वाच्यं। तेन
4 यत्रैव पित्रोरभावो निमित्तं तत्रैव जीवतोरपीत्यपि शब्देन जीवनस्यापि शास्त्रकीर्तनान्नान्यमातुरभावो मातृधने व्याख्येयः। एतच्च विस्तरेणवक्ष्यं। तस्मा
त् पितामहधनस्यापि पित्रोरभाव इत्येको विभागकालः। तथा मातुर्निवृत्ते रजसि पितुरिच्छात इत्यपरः। न तु पितुरिच्छामंतरेणैव तस्य विभागः। अनी
शास्ते हि जीवतोः। तथा अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते। तथा जीवति चेच्छति तथा पितुरनुमत्यादाय भागः। तथा जीवति पितरि रिक्थवि
भागोऽनुमतेः। तदेवमादि मनुनारदगौतमबौधायनशंखलिखितादिभिरविशेषेण जीवति पितरि पुत्राणां यावद्धनगोचरासामित्वस्य पितुरिच्छाधी
नविभागस्य च प्रतिपादनात्। पैतामहधनविभागस्य द्वयगेमिरनभिधानाच्च। पैतामहधनगोचरत्वमप्यनीशत्वपित्रनुमतिवचनानां। यत्तु याज्ञव
ल्क्यवचनं भूर्या पितामहोपात्ता निबंधो द्रव्यमेव वा॥ तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः। तस्य निरवकालयविघ्रौतेन घो। तितस्तत्च तोर्थः। एम०
यत्र द्वयोर्भ्रात्रोर्जीवत्पितृकयोरप्राप्तभागयोरेकः पुत्रमुत्पाद्य विनष्टोऽन्यो जीवति अनंतरं पिता मृतः तदा पुत्रस्यैव तद्धनं प्राप्नोत्यतिसन्निकर्षात्। तदर्थं सदृशं ५

स्वाम्यमितिवचनं यथा पैतामहे पितुः स्वाम्यं तथैव तस्मिन् मृते तत्सुतानामपि। न तत्र संनिकर्षविप्रकर्षाभ्यां कोपि विशेषः। पार्वणविधिना पिंडदानेन द्वयोरपि तदु
पकारकत्वाविशेषादित्यभिप्रायः। अत एवमृतपितृकः प्रपौत्रोपि पुत्रपौत्राभ्यां सह तुल्यमेवाधिकारी भवति पिंडदानाविशेषात्। जीवति तु पितरि पुत्राणां पिताम
हधनस्वामित्वे सत्यपि पुत्रापुत्रभ्रातृद्वयविभागे तत्सुतानामपि विभागः स्यात्। स्वामित्वाविशेषात्। न चाप्रक्रांतत्वेनानर्थत्वं वचनस्य। अनेकपितृकाणामेव प्रक्र
मात्॥ निबंधः कान्तिकां काञ्चिकां उद्दंडस्वामीत्यन्ये विद्वद्वं। द्रव्यं सहचर्याद्विपदमभिहितं। अयं वा धारेश्वरपुरस्कृतो वचनार्थः॥ इच्छया विभा
गदानप्रवृत्तस्य पितुः पितामहधने सदृशं स्वाम्यं पुत्रैः सह न तत्रात्मोपार्जितधन इव न्यूनाधिकविभागमिच्छातः कर्तुमर्हतीति। यथाह विष्णुः। पिता चेत्पु
त्रान् विभजेत्तस्य स्वेच्छा स्वयमुपात्तेर्थे। पैतामहे तु पितापुत्रयोस्तुल्यं स्वामित्वं। इदं सुव्यक्तं॥ यदि पिता पुत्रान् विभजति तदा स्वोपात्ते न्यूनाधि
कविभागं स्वेच्छया पुत्रेभ्यो दद्यात्। पैतामहे तु नैतत्। यस्मात्तुल्यं स्वामित्वं न पुनः पितुः स्वच्छंदवर्तिता॥ अतः पितापुत्रयोः पैतामहे समविभागार्थं सदृशं
स्वाम्यमिति वचनं पुत्राणां च विभागस्वातंत्र्यार्थमिति द्वयमपि हेयं॥ एवमेवापरवचनमपि व्याख्येयं। अतः पैतामहधने पितुर्भागद्वयं पितुरिच्छातएव च
विभागो न पुत्रेच्छयेति सिद्धं। यच्च मनुविष्णू॥ पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात्॥ न तत् पुत्रैर्भजेत् सार्द्धमकामः स्वयमर्जितं। स्वार्जितत्वेन हेतुना
नाकामो विभजेदिति वदंतो स्वयमनर्जिते पैतामहधने पितुरनिच्छया पुत्राणां विभागं दर्शयतः॥ तत्रापि विभागदानप्रवृत्तः पिता पितामहधनं स्वार्जि

तदन्यस्तु नरकामो विभजे

तेनाकामो विभजेदिति आत्मेच्छात एवेत्यर्थः। न पुनः पुत्रेच्छयापि विभागं ज्ञापयन्तः॥ मणिमुक्तादौ पुनः पैतामहे पित्रा न र्जिते पि स्वार्जितवत् पितुरेव स्वाम्यं न पुत्राधि
5 कृ विभागदानादेतत्। यथाह याज्ञवल्क्यः॥ मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः। स्थावरस्य तु सर्वस्य न पिता न पितामहः॥ पितामह इत्युक्ते तदुक्त विषयं वचनं। मणिमुक्ता
द्युपादाय पुनः सर्वस्येत्युपादानात् सर्वेषां भूम्यादिव्यतिरिक्तानां दानादिषु पितुः प्रभुत्वं। न स्थावरनिबंधद्रव्याणां तत्रापि सर्वस्येत्युपादानात्। सर्वस्य कुटुंबवर्त्तन
हेतोर्दानादिनिषेधं कुटुंबस्यावश्यंभरणीयत्वात्। यथा मनुः। भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनं। नरकं पीडने चास्य तस्माद्यत्नेन तं भरेत्। स्वल्पस्य तु वर्त्तना
विरोधिनो न दानादिनिषेधः॥ सर्वस्यैतानर्थक्यापत्तेः॥ स्थावरग्रहणं निबंधद्विपदयोरप्युपादानं न्यायात्। दानादिनिषेधसिद्धिः। यदि पुनः सर्वं स्थावरादि
विक्रयमंतरेण कुटुंबवर्त्तनमेव न भवति तदा सर्वस्यापि विक्रयणादिकमिष्यत इति। सर्वत एवात्मानं गोपायीतेति वचनाच्च। न च स्थावरस्य समस्तस्य गोत्र
साधारणस्य चानेकः कुर्यात् क्रयं दानं परस्परमतिं विना॥ विभक्ता अविभक्ता वा सपिंडाः स्थावरे समाः॥ एकोह्यनीशः सर्वत्र दानाधमनविक्रये॥ एतद्व्यासवचनद्व
येन एकस्य विक्रयाद्यनधिकार इति वाच्यं। यथेष्टविनियोगार्हत्वलक्षणस्य स्वत्वस्य द्रव्यांतरवदत्राप्यविशेषात्। व्यासवचनं तु स्वामित्वेन उर्वत्तपुरुषगोचरवि
क्रयणे न कुटुंबविरोधात् अधर्मभागिताज्ञापनार्थो निषेधरूपं न तु विक्रयाद्यनिष्पत्त्यर्थं। एवं स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितं। असंभूय सुतान स एम.
कीन्न दानं न च विक्रयः॥ इत्येवमादिकमप्येवं वर्णनीयं। तथा हि कर्त्तव्यपदमवश्यपर्याहार्य्यं॥ तेन दानविक्रयकर्त्तव्यतानिषेधात् तत्करणात् विध्यतिक्रमो भवति 5

नतुदानाद्युपनिष्पत्तिः॥ वचनशतेनापि वस्तुनोऽन्यथाकरणाशक्तेः। अत एव नारदः। यद्येकजाता बहवः पृथग्धर्माः पृथक्क्रियाः। पृथक्कर्मगुणोपेता नचे
त्कार्येषु संमताः। स्वभागान्यदि दद्युस्ते विक्रीणीयुरथापि वा॥ कुर्युर्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य वै। प्रकृतमनुसरामः॥ नदेवमुक्तप्रबंधेन पैतामहादिधने पि
तापुत्रयोः समविभागविधानानुपपत्तेः पुत्राणां विभागस्वातंत्र्यप्रतिपत्तिपरत्वाभावाच्च जनकेच्छाधीनन्यूनाधिकविभागनिराकरणार्थत्वात् पितृकृतस्य भ्रात
पुत्रस्य पितृत्वेन सह तुल्याधिकारार्थं वा वचनं॥ एवं पैतामहधनस्यापि पितुरिच्छयैव भागः कार्यः। किंतु निवृत्ते रजसीति विशेषः॥ स्वोपार्जिते तु रजोनिवृत्तिमंत
रेणापि। पितुरूर्द्धमित्युभयत्राप्यविशिष्टं। तेन पैतामहेपि कालद्वयं॥ तत्र यदा पितैवेच्छातः पुत्रान्विभजति तदा पैतामहादिधनाद्भागद्वयं स्वयं गृह्णी
यात्॥ जीवद्विभागे तु पिता गृह्णीतांशद्वयं स्वयमिति बृहस्पतिना तथा द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पितेति नारदेन चाविशेषेण प्रतिपादनात्॥
किंच इतोपि पितामहधनात् पितुर्भागद्वयं ज्येष्ठस्य विंशउद्धारः सर्वद्रव्याच्च यद्वरं। ततोऽर्द्धं मध्यमस्य स्यात्तुरीयस्तु यवीयसः॥ तथा एवं समुद्धृतोद्धारे समा
नंशान्प्रकल्पयेत्। उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना॥ एकाधिकं हरेत् ज्येष्ठः पुत्रोऽध्यर्द्धं ततोऽनुजः। अंशमंशं यवीयांस इति धर्मो व्यवस्थितः॥
एतैर्मनुवचनैः सर्वद्रव्यवरसहितविंशतितदर्द्धतत्तुरीयोद्धारा दर्शिताः। तथा एकांशाधिकाद्धाधिकचतुर्थभागाभ्यधिकभागाः प्रतिपादिताः। गौतमेनापि विं
शतिभागो ज्येष्ठस्य मिथुनमुभयतोदद्युक्तो रथो गोवृषः। मिथुनमजादीनां अश्वादियुक्तो रथः॥ गोयुक्तो वृषः॥ एतत्सर्वं ज्येष्ठस्य तथा काणखोरकूटवंड्

मध्यमस्यानेकाश्चेत्। रथो रोवृक्षः कूटो ग्रामनाकृतिः षंडो विकृतस्तत्लांगलः॥ एते मध्यमस्य यदि बहवः पशवो भवंति। तथा गविंद्यान्यायसी गृहं म नोपुक्तं चतुष्पदं मेकै
६ कं यवीयसः समभितरस्तं वे। अविभक्त तयोर्यवीयसः। अवशिष्टं सर्वं समं विभजेरन्निति प्रतिपाद्य द्व्यंशी वा पूर्वजः स्यादेकैकमितरे षामिति स्त्रे शंशद्वयं
ज्येष्ठस्योक्तं। नचोपार्ज्जितत्वेनांशद्वयं ज्येष्ठस्येति वाच्यं। उद्धारेऽनुष्ठिते भागद्वयस्याभिधानात्। अनर्ज्जितत्वे च उद्धारस्यासंभवात्॥ मध्यमकनीयसोश्चो
पार्ज्जितत्वे न ज्येष्ठेनाप्यविशेषात् तयोरध्यर्द्धादिविधानानुपपत्तेः ज्येष्ठादिपदानर्थक्याच्च। अत एव पुत्रिकौरसयोः पितृधनविभागे मनुराह। पुत्रि
कायां कृतायां तु यदि पुत्रोऽनुजायते। समस्तत्र विभागः स्यात् ज्येष्ठता नास्ति हि स्त्रियाः॥ इति स्त्रीत्वेन ज्येष्ठत्वाभावात् समभागतां प्रतिपादयन् पुरुषस्य
भागद्वयं ज्ञापयति। यत्तूक्तं यथा होलाकाधिकरणे प्राच्यकर्तृकहोलाकानुष्ठानोपपत्तये होलाकाकर्त्तव्येति श्रुतिः कल्पिता। तावतैव तदुपपत्तेः॥
नच प्राच्यादिपदवती कल्पना गौरवात् तद्वदत्रापि अर्ज्जकोंऽशद्वयं गृह्णीयात् इति श्रुतिः कल्पनीया। नपुनः पित्रादिपदवती तदयुक्तं। तत्र प्राच्यकर्तृकानु
ष्ठानस्यावश्यकल्पनीयसामान्यश्रुत्यैवोपपत्तेः। नचाप्राच्यानामननुष्ठानार्थं प्राच्यपदवती कल्पनमिति वाच्यं। अननुष्ठानस्याचाररूपस्य श्रुतिकल्प
नानिमित्तत्वानुपपत्तेः॥ इह तु मन्वादीनां ज्येष्ठपदप्रयोगात् तदुपपत्तये ज्येष्ठपदवत्याः एव श्रुतेः कल्पनार्हत्वात्॥ अर्ज्जकपदवत्या अवश्यकल्पनीयत्वाभावा एम०
त्। ज्येष्ठपदवत्या अर्ज्जकपदवत्याश्च कल्पनायां विशेषाभावात्। नचान्यत्रार्ज्जकस्य भागद्वयार्थं श्रुतेरवश्यकल्पनीयत्वादत्रापि सैव मूलमस्त्विति लाघवात्। ज्येष्ठ ६